श्रीगणपतिपतये नमः॥ श्रीवाग्देवीश्वरमतलक्ष्मीनमः॥ श्रीगुरुभ्यो नमः॥ ॐ पूर्वग्रंथश्रवणे प्रवृत्तानामुत्तरग्रंथश्रवणे
प्रवृत्तये निरूप्यते इति अथ उपमानं निरूप्यते अनंतरं शब्दो निरूप्यते ज्ञाप्यते वर्त्तमानज्ञापनविषयीभूतः शब्द इत्यर्थः। उप
मानं निरूपणे न शिष्यस्य उपमानज्ञानादुपमानजिज्ञासा निवृत्तौ सत्यां अवश्यं वक्तव्येन ज्ञाने न शब्दं निरूप्यमिति भाव
ः। तत्रेति। वर्त्तमानविषयीभूते तूर्यकं शब्दं इति विशेष्यं च निरूपणविषयीभूतः शब्दः शाब्दप्रमिति करणमि
ति योजनाः। तथा च लक्षणतावच्छेदकं शाब्दत्वं शाब्दप्रमिति करणत्वं लक्षणं प्रमिति करणत्वमात्रं प्रत्यक्षादावतिव्या
प्तेः अतः शाब्दे इति॥ शाब्दकरणत्वं रूपं शब्दप्रमाणसामान्यमात्रविसंवादिवह्निनास्तिचतीत्यादिवाक्ये अतिव्याप्ते
अतः भ्रमीति। अत्रेदं चिंत्यते शाब्दकरणत्वरूपं शब्दप्रमाणसामान्यलक्षणं प्रमिति पदं दत्तेपि वह्निनास्तिचतीति वा
क्ये शाब्दप्रमिति करणत्वरूपसामान्यलक्षणस्यातिव्याप्तिरस्त्येव। तादृशे वाक्ये वह्नित्वांशे कत्वांशे च प्रमाजनक
त्वात् तादृशे भ्रमजनकवाक्यस्याभावात्। अतएव वानुमिति करणत्वरूपानुमानसामान्यलक्षणं न प्रकृतं तत्र भावः
कृतः। प्रयोजनाभावादिति शाब्दकरणमेव शाब्दं इति सम्यक्। विशेषलक्षणं तु प्रमिति पदं देयमेव। ननु शाब्दत्वज्ञा
नं विना शाब्दप्रमिति करणज्ञानासंभवादत आह॥ शाब्दत्वं चेति। ननु शाब्दत्वज्ञानं तत्र तत्त्वे शाब्दे अप्यपक्षे तत
र भेदानुमितौ शाब्दत्वस्य पक्षतावच्छेदकतया हेतुत्वासंभवापत्तेः। उपमितावति व्याप्तिव्याप्तिवारणाय अ
न्यांतमिति। अन्यांतं पदविषयत्वाव्यभिचारिज्ञाति अन्यत्वेति। सर्वासामुपमितीनां पदशक्तिपदं एकं तया उपमि
तित्वस्य पदविषयत्वाव्यभिचारत्वात् पदापि पत्रकाओषधीज्वरं हंतीति शाब्दे मुक्तपत्रास्तदृश्यौषधीज्वरहं
तीत्युक्ते तादृशौषधीदर्शने तादृशं वाक्यार्थं स्मरणादिपं ज्वरं हंतीत्युपमित्या ज्वरहरणकार्यं करणभावय
त्तत्रोपमितेः पदविषयकत्वाभावे नोपमितित्वस्य पदविषयकत्वं अव्यभिचारित्वेन उपमितावति व्याप्तिस्तद

लक्षणे चशब्दप्रमाणसामान्यलक्षणे प्रमितिपदं व्यर्थमेव आंशिकप्रमाजनकवाक्यस्य लक्ष्यत्वात् सर्वांशे

वस्थैव। तत्रोपमितेः पदशक्तिमात्रपारतंत्र्यादत्रानुमानादिना कार्यकारणभावग्रहणहेतुत्वं। अथवा पदविषयत्वाव्यभिचारि
णीति अन्यत्वस्योपमितित्वे अन्यत्वे इत्यर्थीकरणात्रोक्तदोषः॥ अथवा योग्यतिशब्दव्यक्तिमात्रायत्तशक्तिसमवेतप्रत्यक्षत्वे
वेतधर्मसमवायित्वं शाब्दत्वमिति लक्षणं। ध्रुवं सोपमिति सः शाब्दप्रमिति करणरूपलक्षणविषयः। आमीपालो
जनमिति॥ गोपालानां जडतरत्वे पितरंगनाप्रयंतानुध्यावनं जडतमत्वप्रदर्शनार्थं। आचंडितमिति चकारः आमा
दिकः पाठः। आपंडितं चेति पुनः पाठः। पंडितमपि व्याप्येत्यर्थः। तथा गोपालानां गणमपि व्याप्य पंडितपर्यंतानां
सर्वेषामित्यर्थः। चेत्रवाक्यादनुमर्थं प्रत्येमीति प्रतीतेरिति चेत्रवाक्यजन्यार्थविषयकप्रतीतिमानहमित्यर्थः। चे
त्रवाक्यादनुमर्थं प्रत्येमीति प्रतीतेस्तत्स्मरणित्वे चतया चेत्रवाक्येपि अर्थविषयकप्रतीतिजनकत्वं विषयतया भा
वः। केवलमिति संदधते इत्यर्थः केनविप्रतिपद्यते इत्यनेनान्वयि। अनुमानविध्यपेक्षा। तज्जनकत्वमनुमान
विध्यपेक्षा। अन्यथा च स्वातंत्र्येण वा। तथा च तज्जनकत्वे अनुमानविध्यपेक्षा स्वातंत्र्येण वा तत्र केवलं विप्रतिप
त्ते इति फलितार्थः। तत्रेति। तयोर्मध्ये अनुमानविध्यपेक्षा। तज्जनकत्वमिति शेषः। तदवस्थितिचारिति। आकाश
वत्तिचात्। ननु यथा कथंचित्संबंधेन घटादेरपि आकाशसंबंधित्वं तस्यैव व्याप्तिशरीरसंबंधित्वं
वनिवेशनीयं ननु अधिकरणार्थं। तथा च शब्दोऽनुमानमध्यगतं भवति अत आह॥ दृश्यते चेति। व्याप्ति
नविध्युपाधिमाप्तिज्ञानं अन्यानामपि। अन्वयानुभवः पदार्थयोः संसर्गानुभवः। अयं व्याप्तिज्ञानं विना
पदार्थसंसर्गानुभवः तस्या अनुमितेः ननु व्याप्तिज्ञानं विना शाब्दान्वयानुभवो न भवत्येवेत्यत आह। प्रतिपदति
चेति। प्रतिपदंति च जानंति च। अतः शाब्दबोधविषयीकृते। पामरगणमिति। जडानामगृहीतशक्तिकानां
तथा च तत्सहकारित्वात् शब्दस्य सहकारित्वात् इयं शब्दस्य सहकारिग्रहविषयीभूता। सहकेति। य

श्रीगणेशाय नमः॥ श्रीवाग्देवीश्वरमतलक्षणेभ्यो नमः॥ श्रीगुरुभ्यो नमः॥ ॐ पूर्वग्रंथश्रवणोपरान्तानामुत्तरग्रंथश्रवणा
प्रवृत्तिर्निरूप्यते इति अथ उपमानं निरूप्यते अनंतरं शब्दो निरूप्यते ज्ञाप्यते वर्त्तमानज्ञापनविषयीभूतः शब्द इत्यर्थः। उप
मानं निरूपणेन शिष्यस्य उपमानज्ञानादुपमानजिज्ञासा निवृत्तौ सत्यां अवश्यं वक्तव्येन ज्ञाने न शब्दं निरूप्यमिति भाव
ः। तत्रेति। वर्त्तमानविषयीभूते तु अर्थकं शब्दं इति विशेष्यान्वयि निरूपणविषयीभूतः शब्दः शाब्दप्रमिति करणमि
ति योजनाः। तथा च लक्षणतावच्छेदकं शब्दत्वं शाब्दप्रमिति करणत्वं लक्षणं प्रमिति करणत्वमात्रं प्रत्यक्षादावतिव्या
प्तेः अतः शाब्देति॥ शाब्दकरणत्वं रूपं शब्दप्रमाणसामान्यमात्रविसंवादिवह्निनासिचतीत्यादिवाक्ये अतिव्याप्ति
अतः भ्रमीति। अत्रेदं चिंत्यते शाब्दकरणत्वरूपशब्दप्रमाणसामान्यलक्षणो प्रमिति पदं दत्वेपि वह्निना सिंचतीति वा
क्ये शाब्दप्रमिति करणत्वरूपसामान्यलक्षणस्यातिव्याप्तिरस्त्येव तादृशे वाक्ये वह्नित्वांशे कत्वांशे च प्रमाजनक
त्वात् तादृशे भ्रमजनकवाक्यस्याभावात्। अतएव वानुमिति करणत्वरूपानुमानसामान्यलक्षणेन प्रकृतं तत्र भावः
कृतः। प्रयोजनाभावादिति शाब्दकरणमेव शाब्दं इति सम्यक्। विशेषलक्षणे तु प्रमिति पदं देयमेव। ननु शाब्दत्वज्ञा
नं विना शाब्दप्रमिति करणज्ञानाऽसंभवादत आह॥ शाब्दत्वेति। ननु शाब्दत्वज्ञानं तर्हि तत्त्वे शाब्दबोधपक्षे त
र भेदानुमितौ शाब्दत्वस्य पक्षतावच्छेदकतया हेतुत्वासंभवापत्तेः। उपमितावति व्याप्तिव्याप्तिवारणाय अ
न्यांतमिति। अन्यांतं पदविषयत्वाव्यभिचारिजातिशून्येति। सर्वासामुपमितीनां पदशक्तिपदं एकं तया उपमि
तात्वस्य पदविषयत्वाऽव्यभिचारत्वात् यद्यपि यत्रकाश्चौषधीज्वरं हंति इति प्रश्ने मुक्तपक्षे तादृश्यौषधीज्वरे
तीत्युत्तरे तादृश्यौषधीदर्शने तादृक् वाक्यार्थस्मरणादिपं ज्वरं हंतीत्युपमित्या ज्वरहरणकार्यं कारणभावय
हस्तत्रोपमितेः पदविषयकत्वाभावे नोपमितित्वस्य पदविषयकत्वं अव्यभिचारित्वेन उपमितावति व्याप्तिस्तद

तस्यैव लक्षणे चशब्दप्रमाणसामान्यलक्षणे प्रमितिपदं व्यर्थमेव आंशिकप्रमाजनकवाक्यस्य लक्ष्यत्वात् सर्वांशे

तस्यैव तत्रोपमितेः पदशक्तिमात्रपरत्वे तत्र शाब्दानुमानादिना कार्यकारणभावग्रहे तद्ग्रहे पदं। अथ वा पदविषयत्वाव्यभिचारि
जातिशून्यत्वस्योपमितित्वशून्यत्वे स्वीकरणात्रोक्तदोषः॥ अथ वा यो कोचित् शब्दव्यक्तिमादाय तद्व्यक्तिसमवेतप्रत्युत्पन्नसम
वेतधर्मसमवायिनं शाब्दत्वमिति लक्षणं। ध्रुवं सोपमितिः सः शाब्दप्रमिति करणरूपलक्षणसामविष्टः। आसोपालां
गनमिति॥ गोपालानां जडतरत्वे पितरं गनाय पंक्तानुध्यावनं जडतमत्वे प्रदर्शनार्थं। आचंडितमिति चकारः आसा
दिकः पाठः। आपंडितं चेति पुनः पाठः। पंडितमपि व्याप्येत्यर्थः। तथा गोपालानां गनाभिव्याप्य पंडितपर्यंतानां स
र्वेषामित्यर्थः। चेत्रवाक्यादनुमर्थं प्रत्येमीति प्रतीतेरिति चेत्र वाक्यजन्यार्थविषयकप्रतीतिमानहमित्यर्थः। चे
त्रवाक्यादनुमर्थं प्रत्येमीति प्रतीतेस्तत्स्मरणित्वे यतया चैत्रवाक्येपि अर्थविषयकप्रतीतिजनकत्वं विषयतया भा
वः। केवलमिति संदिग्धं ते इत्यर्थः केनविप्रतिपद्यते इत्यनेनान्वयि। अनुमानविध्यपेक्षा। तज्जनकत्वमनुमान
विध्यपेक्षा। अन्यथा च स्वांतं त्रैराशिकवा। तथा च तज्जनकत्वं अनुमानविध्यपेक्षा स्वांतं त्रैराशिकवेति केवलं विप्रतिप
त्ते इति फलितार्थः। तत्रेति। तयोर्मध्ये अनुमानविध्यपेक्षा। तज्जनकत्वमिति शेषः। तदवच्छिन्नेति। आकाश
वृत्तित्वात्। ननु यथा कथंचित्संबंधेन घटादेरपि आकाशसंबंधित्वं तस्यैव व्याप्तिशरीरे संबंधित्वं
वनिवेशनीयं ननु अपि करणत्वं। तथा च शब्दोऽनुमानमध्यगतो भवति अत आह॥ दृश्यते चेति। व्याप्ति
नविध्यपेक्षा व्याप्तिज्ञानमपि शून्यानामपि। अन्वयानुभवः पदार्थयोः संसर्गानुभवः। अयं व्याप्तिज्ञानध्यानं
पदार्थसंसर्गानुभवः तस्या अनुमितेः ननु व्याप्तिज्ञानं विना शाब्दान्वयानुभवो न भवत्येवेत्यत आह प्रतिपति
चेति। प्रतिपंति च ज्ञानं तिच। अतः शाब्दबोधविषयीकृतं। पामराणामिति। जडानामगृहीतशक्तिकानां
तथा वृद्धसहकारित्वात् शब्दस्य सहकारित्वात् इयं शब्दस्य सहकारिग्रहविषयीभूता। कैतेति। अ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्माद्द्वादशमर्थो वेद्य इत्याकारके द्वे स्वर्थः॥ सचेतासमभिधानामपदार्थान्तरग्राहकः अभिधात्मको वा हेतु
रिति॰ अथैवमित्यर्थः। पामरादीति। आभीरादीत्यर्थः॥ अपभाषितेषु को पामरादिसंकेतितज्ञानवत्॥ सईश्व
रसंकेतः। शक्तिभ्रमादिति॰ गगरी घटादिपदे घटादिपाठभ्रमात् घटादौ शक्तिसंबंधेन गगरीपटादिपदभ्रमाद्
त्यर्थः। तेनापभाषितेशब्दे प्रसिद्ध्या भ्रमात् भवेत्। तत्तेति। तद्वदः। ईश्वरसंकेतयद्वः। तेषामपि पामरादीनां
ईश्वरविदुषां मीमांसकादीनामपि॰ तथा ज्ञानं संकेतत्वेन ईश्वरसंकेतज्ञानं॰ आधुनिकसंकेतितानां आधुनि
कैः पित्रादिभिः संकेतितानां कागतिरिति॰ कथं शक्तिग्रहसहकारित्वमित्यर्थः। तेषां ईश्वरसंकेतानामाधादित्य
र्थः। द्वादशेऽनिपातानामकर्मादितीति॰ द्वादशेऽनिपातानामकर्मादित्याकारके स्वर्थः। तस्यापि॰ तेषामपि आ
धुनिकसंकेतितानां चैत्रादिशब्दानामपीति यावत्॰ बहुवचनांतत्वेन प्रक्रांतानां चैत्रादिशब्दानां तस्यैकवचने
नांततद्धर्मेण परामर्शस्यानुचितत्वादीश्वरसंकेतितत्वमीश्वरसंकेतानामपि स्वर्थः आधुनिकसंकेतितानां चैत्र
त्रादिशब्दानां अपि द्वादशेऽनिपातानामकर्मादित्याकारके सामान्ये ईश्वरसंकेतानामपि यत्वमित्यर्थः। इदानीं
ति। शक्तिग्रहसहकारित्वमिति शेषः स्याद्वेतदिति॰ एतद्वस्यमाणं॰ यामिति॰ अनुपदं निरूपितः अयं अस्मा
द्वादशमर्थो वेद्य इत्याकारिकेश्वरज्ञानरूपः। कथं ज्ञातः। किं हेतुज्ञानविषयः उपमानादिति॰ उपमान
जन्यज्ञानविषयइत्यर्थः। तस्योपमानजन्यज्ञानस्य॰ तस्य च वाक्यार्थज्ञानस्य॰ अवसरादिति॰ अवसरादेवेत्यर्थः
। तथा घटमानयेति वाक्यार्थः तच्च घटानयनं च उपलभमानः जानानः। तथा घटानयनरूपया। तस्य प्रयोज्य
वेदस्य॰ प्रयत्नमनुमिनोति क्रियायाः प्रयत्नजन्यत्वादितिभावः। अनुमानस्य कारणं अयं घटानयनाद्य

वालः।

वालः।

नुकूलप्रयत्नवान्॰ घटानयनवत्त्वादिति॰ तेनचेति॰ अनुमितेनेत्यर्थः। तस्य प्रयोज्यवेदस्य ज्ञानमनुमिनोतीति अनुमानप्रका
रकं॥ अयं घटानयनज्ञानवान् घटानुकूलप्रयत्नवत्त्वादिति॰ स्वप्रयत्ने॰ स्वस्य प्रयत्ने॰ तेनवाक्येन तथानि अयादिति॰
ज्ञानव्यापत्त्वात् अयात्॰ ततः ज्ञानानुमितस्यानंतरं तद्वाचकानां तेषां घटानयनगोचरज्ञानकारणानां तेषां शब्दमेव घटमानये
तिवाक्यमेव तदनंतरं॰ तादृशवाक्यकल्पनानंतरं॰ घटादिपदानां घटमानयेति॰ पदानां आपोहाभ्यां अन्वयव्यतिरेकाभ्यां
भ्यां लक्षितं तस्मिन्निति॰ तस्मिन् घटपदे घटव्यक्तिजनकत्वे॰ अतिप्रसंगभंगाय घटपदस्य शक्तिग्रहं विना घटबोधजनन
कत्वे रूपातिप्रसंगभंगाय॰ तज्जननानुकूलं घटव्यक्तिजननानुकूलं संकेतरूपं॰ तदनंतरं चेति॰ अवसरात् शक्तिग्रहान
तरं चेत्यर्थः। कुचिदिति॰ कलशादिपदे अवसरादिति॰ अत्र शक्तिग्रहे त्वनुवर्तते कुचित्तगवयपदादौ उपमानात् तत्सादृश्यवि
शिष्टे तत्पदवाच्यत्वरूपवाक्यार्थानुभवरूपादुपमानादित्यर्थः अत्रापि शक्तिग्रहइत्यनुवर्तते॰ कुचित्पिकपदादौ शब्दात् कोकिलः
पिकपदवाच्यइत्यादिशब्दाच्छक्तिग्रहइत्यनुवर्तते॰ कुचिद्धातुप्रत्ययादौ मंडूकादिशब्दे च॰ व्याकरणकोशादितीति॰ व्याकर
णात्कोशाच्चेत्यर्थः तथाच धातुप्रत्ययादौ व्याकरणान्मंडूकादिशब्दे च कोशाच्छक्तिग्रहइति योजना व्याकरणात् भूसत्ता
यां लडित्यादिरूपं व्याकरणादित्यर्थः कोशात्मंडूकः स्त्री जनाश्रय इत्यादिकोशादित्यर्थः। स्यादेतदिति॰ एतद्वस्यमाणं॰ द्वयो
रिति वेदयोरित्यर्थः वक्ष्यतेति वालेनेति शेषः॥ तयोरेव॰ वेदयोरेव॰ अन्ययोः। अनवस्थापत्तेरिति॰ तयोरेव कथमिति
रीत्या अनवस्थापत्तेः॥ स्वर्थः अनादित्वात् अनवस्थाया अनादित्वात्। इयमनवस्थादुष्टेवेतीतिः तथाचवी
जांकुरन्यायेन॰ अनाद्यनवस्थादुष्टेवेतिभावः। शंकते प्रत्ययस्यादिना प्रत्ययेखंडप्रत्ययेः। कार्यद्रव्यानधिकरणकाल
नसभावकार्यधिकरणत्वे भावः कार्यधिकरणकालस्य कार्यद्रव्यानधिकरणत्वेवेतिपाठे तत्तेनासिद्धिव्याघा
तः कार्याधिकरणकालस्येति॰ भावः कार्यधिकरणकालस्येत्यर्थः। तेनननमहाप्रलयसाधारणमिति॰ तथाच वह्नि

नीतिरेकशरीरावच्छिन्नो घटमानयेति वाक्यमुच्चारयति। अन्यशरीरावच्छिन्नो घटमानयेत्यर्थः। ततः तदनन्तरं तच्छब्दात्। शरीरादि
ठ्यावच्छिन्ने स्वरूपवदात्मपूर्ववत्। तस्मिन्नुपलभमानो बोध इत्यादिकप्रकारेण संकेतशक्तितेषामन्यादीनां शंकते। अन्यथा अन्यथा
त्यादिना पूर्वसर्गव्यवहारस्येति पूर्वसर्गव्यवहारस्येत्यर्थः एवमप्यनुपपन्नेरिति एतत्पूर्वसर्गसिद्धसर्वत्वमन्यादिभिरप्यनुप
पन्नेः तत्रापि तत्पूर्वसर्गादावपि अन्येमन्यादिभिर्व्यवहारप्रवर्तकाः। प्रतिसर्गसर्गेषु भूयसां बहूनां तथाभावकल्पनायां
व्यवहारप्रवर्तकत्वकल्पनायां शंकते। अस्त्वेकशतासर्वत्र सर्वत्र प्रतिसर्गं मूलव्यवहारप्रवर्तकः। समाधत्ते। सत्यमेति सत्यमेव प्रतिसर्ग
व्यवहारप्रवर्तकत्वेन कल्पनेन एकत्वमेव अस्माकमिति मतमिति शेषः। किमितदर्थस्तु कार्यसकर्तृकं कार्यत्वादिति अनुमानात्सिद्धि
रिति। स्यादेतदिति। एतद्दृष्टमात्रांतरकाशिशब्दस्य सदृशी। तस्य घटशब्दस्य पत्रपत्रिभिन्नेर्थः सः शब्दः तदर्थः सचासौ अर्थश्चेति
तदर्थः तं तदर्थं यथा श्रुतेर्तर्थमित्यपेक्षितं देशांतरीयस्य काशीभिन्नदेशस्थपुरुषस्य तस्य देशांतरीयस्य तस्यापि काशी
स्य गव्यादेव गोत्वमेवेति गोपदस्य कुमित्याकारकं। तथासति गवीतरासमवेतत्वविशिष्टसकलगोसमवेतत्वमेव तत्त्वं तस्य
गोत्वस्य धर्मिता वच्छेदकतयानिवेशेति गोरवापत्तेः यद्धर्मधर्मिताव च्छेदकशक्तिप्रकारकशाब्दबोधइति नि
यमबलाद्गोत्वेत्वं रूपे गोत्वं गोत्वभिन्नं स्यात्। ननु निरवच्छिन्नेतरेतरद्वयं न च शुद्धगोत्वविशेष्यकशक्तिप्रकारकज्ञानादेव
शाब्दबोधः। नतु शक्तिग्रहे गोत्वत्वस्य धर्मिता वच्छेदकतयानिवेशइति वाच्यं। निर्धर्मिता वच्छेदकशक्तिज्ञानस्य शाब्द
बोधजनकत्वात्। तथासति गोत्वं नपदशक्यइति वाध्यत्वं अपदशाया मपि तादृशानिर्धर्मिता वच्छेदकतयानिवेशइति
वाच्यं शक्तिज्ञानाभावे शाब्दबोधापत्तेः इ[illegible]ष्टापत्तौ वा पत्रपत्रिभिन्नतानुभववि रोधाच्चेति चेत्न शक्तिसंबंधेन गोपदवि
शेष्यकगोत्वप्रकारकं गोपदं गौरित्याकारकं शक्तिज्ञानमेव शाब्दधीहेतुः शंकते। कथमिति अशक्तिलाभः आश्रयलाभः
समाधत्ते। तदाक्षेपादिति। तदाक्षेपात्। तस्य आक्षेपात्। तदाक्षेपात्। अत्र च संबंधत्वरूपसंबंधार्थकषष्ठीसमा
सः। तथाच गोत्वेन आक्षेपादित्यर्थः। अशक्त्याक्षेपात् तस्याश्रयस्येत्यर्थमाहुः। तन्त्र। मनोरमे। कथं तर्हि अशक्तिलाभ

व्यापकविषयितानुयोगित्वमेव ननु जातिभासकसामग्र्या नव्यशक्तिबोधजनकत्वं सेयुक्तसमवायादिघटिता
इति प्रश्ने आक्षेपादित्युत्तरस्यैव समुचितत्वात्। नतु व्यक्त्याक्षेपादित्युत्तरस्यैवायमाक्षेपस्तस्येत्यत्र तस्याइति स्त्रीलिंगनिर्देशस्यैव समुचित्वा
त्। नन्वेतस्येति निर्देशस्येति कथं तर्हि व्यक्तिलाभइति प्रश्ने व्यक्तिपदस्यैव निर्देशात्। तं आश्रयं। महमतनिराकरणपूर्वकं गुरुः स्वम
तं दर्शयति। अनुपपत्तिज्ञाने मतेरणापीत्यादिना अनुपपत्तिज्ञानं विनापि। तस्मादिति। गोरस्तीति वाक्यजन्यशाब्दबोधस्यानुप
पत्तिज्ञानं विनापि। गोत्वविशिष्टविषयकत्वादित्यर्थः। समानविभिन्नवैधर्म्यं जातिआश्रयकसामग्री गाद्यत्वं जातिविषयितानुयोगि
विषयितानवच्छेदकत्वमिति यावत्। तेन जातिव्यक्त्योर्विभिन्नआश्रयकत्वेन सत्तिः। समानविभिन्नवैधर्म्यमेव दर्शयति। यावतीति
। इदमेव व्यक्तौ जातिविषयितायाव्यापकतावच्छेदकत्वज्ञानादिघटितायाश्च जातिभासकसामग्र्याः संयोगादिघ
टितव्यक्तिभासकसामग्रीतो व्यापकत्वज्ञानादिघटितव्यक्तिभासकसामग्रीतश्च भिन्नत्वादत आश्रयेति। अन्य
शब्दशक्त्या अन्यस्मिन्नशब्दशक्त्येत्यर्थः अन्यबोधने। त्वशक्यभिन्नबोधनेति प्रसंगः घटशक्त्या पटबोधप्रसंगः
। नन्वेतादृशानियमे किंमानमित्यतआह। अन्यथानुपपत्तेरिति। तथैव जातिशक्तपदस्य जातिविशिष्टबोधकत्वमेव। तत्जातिपदशक्तस्य
जातिबोधकत्वं। अत्र मीमांसकभिन्नानैयायिकाः। नहीमे ते। नस्वीकुर्वंति। तथासति जातिशक्तस्य जातिविशिष्टबोधकत्वे गोत्व
मस्तीत्यतो विशिष्टविशिष्टत्वयापत्तेरिति। अथ गोत्वं नपदं किंतु गोपदघटितं वाक्यमेव। न हि शक्तिरस्तीति चेत्। न
गोत्वमित्यत्र गोपदोत्तरत्वप्रत्ययस्य गोत्वे शक्तत्वात्। भावप्रत्ययस्य प्रकृत्यर्थतावच्छेदकधर्मबोधकत्वस्य गुणा
शिरोमणौ प्रतिपादितत्वादिति। अथ किंतु वाक्यानामनुपयुक्तत्वादुपेक्षितं। तस्मादिति। गोत्वमस्तीति वाक्यत्वात् गोत्वा
विशिष्टबोधापत्तिरूपबाधकेन जातिशक्तपदस्य जातिविशिष्टबोधकत्वाभावादित्यर्थः। गोत्वविशिष्टत्वशक्तिर
ति। गोत्वादिविशिष्टत्वेत्यर्थः। नतु केवलत्वादौ अत्र गवादिपदानामिति षष्ठ्यंतमनुवर्तते। उक्तदोषइति। कथं
गोरस्तीति वाक्यादेशांतरस्थस्य पुरुषस्य गोत्वप्रत्ययो न स्यात्। इत्यापुक्तदोषइत्यर्थः। सामान्यलक्षणायाः प्रत्यासत्ति

त्वं अनेनैव कुर्वतोमते त्वाह अस्तु वेति नन्वेकं गो व्यक्तौ शक्तिर्गोत्वादिवान्यगो व्यक्तौ भी ने भविष्यतीयतेत्राह अन्यशक्तिग्रहादिति
अतिप्रसंगइति गोपदात्मकिपादेरपि बोधप्रसंगइत्यर्थः। इत्येवमिति एवं गोत्वविशिष्टशक्तिग्रहस्य गोत्वविशिष्टप्रत्यायकत्वे अ क
नतिप्रसंगादिति अन्यशक्तिग्रहादन्यव्यक्तिबोधनेऽकृतोषः अतिप्रसंगः। गवादिपदान्महिषादिबोधप्रसंगरूपस्तस्याभावादितअर्थः
प्रदापिकमतेऽस्वरसं प्रदर्शयन्नमतांतरमाह॥ गवेति गौरवादिति विशिष्टशक्तिकल्पने गौरवादित्यर्थः। नचैवमिति एवं गोव्यक्तिना
शक्तिर्नशक्तिकल्पनेऽत्यर्थः। गोत्वावच्छेदकस्येति गोत्वभाने गोत्वेशक्यतावच्छेदकत्वमेवनियामकमितिभावः। स्यादेतदिति एतत्
ग्रहपदस्यमानां पदीति। गोपदस्येति शेषः। तस्यानेकस्यान्वयरूपस्य गोपदार्थशुक्लपदार्थयोः संबंधरूपस्य अशक्यत्वात् गोप
दशुक्लपदयोरशक्यत्वात् अतिप्रसंगादिति गोपदात्पटादेरपि बोधप्रसंगादित्यर्थः। गवान्वयेगोसंबंधः। अतिप्रसंगस्यात
गोपदात्पटादिबोधप्रसंगः स्यात् अन्वयविशिष्टशक्तिग्रहात् व्यवहाराद्वा तस्यान्वयविशिष्टे शक्तिग्रहात्। अन्वये पि पदार्थ
संसर्गेपि शक्तिः पदानां स्मारिका शक्तिः। अन्वयस्य पदार्थसंसर्गस्य अन्यत्वभ्रमत्वादिति गोशक्तपदत्वभ्रमत्वात् अन्यत्वभ्रमस्या
पि शब्दार्थत्वे नत्वगोछेदापत्तिः नत्वर्थापि शक्तिकल्पनापत्त्या नत्वगोछेदापत्तिः। कार्यत्वान्वितेसाक्षात्परंपरान्यतरसं
बंधेन कार्यत्वान्विते पदानां सर्वेषां पदानां शक्तिः आनुमानिकी शक्तिः। कारणतानिर्वाहिका शक्तिरितियावत्। अत्रेदंतत्त्वं
शक्तिर्द्विविधा एकाकारणतानिर्वाहिका अपरा पदसंकेतरूपा इयमेवस्मारिका शक्तिरितिगीयते प्रकृतेचशक्तिपदं कार
णतानिर्वाहिकाशक्तिपरं साचानुभाविकाशक्तिरितिगीयते वस्तुतस्तु आनुभाविकाशक्तिः कारणतारूपैव। तथाचसा
क्षात्परंपरयापटविषयकानिरूपितकार्यत्वविशिष्टविषयताशालित्वेन कार्यतापटपदानामत्वेन कारणतेत्या
दिसर्वेषांपदानां कार्यत्वान्वितपदार्थबोधजनकत्वावधारणमित्यर्थः। शक्तिपदस्य स्मारकशक्तिपरत्वं तुन संगच्छते गु
रुणि नीतावेव पटादिपदानां स्मारकशक्त्यभ्युपगमात् अतएवतन्मतेपि पदजन्यपदात्स्मृतिर्गत्वादिरूपे तो व अनुभव
स्तु लिङ्गादिपदसाचिव्यात्कार्यतावशिष्टस्येवेति पटमानयेत्यादौ पटादौ कार्यत्वान्वयः परंपरयानयनादौ च का

स्मारकशक्त्यभावेच पटादिपदमिति पटादिपदात्कार्यत्वानुपस्थितौ पटादिपदं कथं तदन्वयं बोधयेदिति योजनांतरं चि
तबोधकार्यत्वान्वितबोधं ननु पटादिपदात्कार्यत्वानुपस्थितावपि पटादिपदस्य कार्यत्वविशिष्टशाब्दबोधजनकत्वे किं बाध
कमित्यत आह। कार्यत्वान्वयबोधइति तदुपस्थितेरपि कार्यत्वोपस्थितेरपि हेतुत्वादिति प्रकृते च तदभावादिति भावः॥
तिहेतोर्नार्थवादस्याप्रामाण्यमिति अर्थवादस्य शब्दस्य शब्दप्रमाजनकत्वेनेत्यर्थः आवापोद्वापाभ्यां अन्वयव्यतिरेकाभ्यां
लाघवात्कार्यत्वान्वितपटपदस्य पटस्यलाघवात् नतु कार्यत्वान्वयेपि शक्तिग्रहइति प्राक्तनमनुवर्तते अन्यत्व
भ्रमत्वात् अन्वयस्य पटादिशक्तपदत्वभ्रमत्वात् प्रथमं व्यवहाराद्वा शक्तिग्रहः पूर्वकाले च व्यवहाराद्वा शक्तिग्रहः काले च अन्यत्व
भ्रमत्वे पटादिपटादिपदत्वभ्रमत्वे। प्रथमं अन्यत्वभ्रमानुपस्थितिकालात्प्रागन्यत्वभ्रमत्वानुपस्थितिकाले च पदार्थस्मिन्काले तद
पस्थितेरन्यत्वभ्रमत्वमनुपस्थितेः तदा तस्मिन्काले अन्यत्वभ्रमत्वोपस्थितिकाले तदुत्तरकाले च पटमात्रे केवलपटे साक्षा
त्कार्यत्वान्वयेशक्तिः गौरवात् कार्यत्वान्वयेपि शक्तिकल्पने गौरवात् कथमिति बाधितुमीष्टे इत्यनेनान्वयः ननु प्रथमप्रवृत्तौ
दवत्वत्वादित्यत आह। नहीति शास्त्रे तत्तन्मतस्य प्रतीत्या चरमप्रवृत्तौ शास्त्रजन्यपटं तारकादिमहत्त्वप्रतीत्या ननु चरमप्रवृ
त्तौ दृष्टामपि पटं तारकादिमहत्त्वप्रतीतौ शास्त्रजन्यत्वमेव वक्तव्यमतोऽन्यथा पूर्वं प्रतीतपटं तारकादिमहत्त्वं तावाध्यतां चरमप्रवृ
त्तौ पटमात्रशक्तिकल्पनायां तु नकिंचिन्नत्वमित्यत आह॥ चरमकल्पनायां त्वाह लाघवं सहायतया कार्यत्वान्वि
तपटत्वाद्येतया पटत्वस्य चक्षुरूपसहायतया अत्र वाक्ये यथा भेदे तदन्वयं अवलंबत्वेतथा चलाघवं सहायतयापि अ
वलंबत्वाच्चेत्यर्थः। नचात्र लाघवं सहायतया बलवत्वेपि चरमकल्पनायां लाघवं सहायतया नबलवत्वमित्यत आह किंचैव
मितरवंसर्वेषां शब्दानां कार्यत्वान्वितशक्तिकल्पने काव्यादिभ्यः रघुवंशकाव्यादिभ्यः अनुभवसिद्धं प्रत्यक्षसिद्धः। अन्व
यानुभवः पदार्थयोः संसर्गानुभवः असंसर्गानुभवः संसर्गस्य संबंधस्याभावो काव्यस्य पदोपस्थापितपदार्थेष्वि
तिभावः तदापत्तेः असंसर्गग्रहमात्रापत्तेः दृष्टापत्तावहा। तथाचेति। तथाचपटमानयेत्यादावपि असंसर्गग्र
हमात्राभ्युपगमेच शब्दप्रामाण्यप्रत्याशया शब्दप्रामाण्यप्रत्याशागमने सुतरां शब्दप्रामाण्यगमनमितिभावः न
पटमानयेत्यादौ तत्रैव लजनानुभवसिद्धो न्वयानुभवोपहतुं न शक्य इत्यत आह किंचैवमिति

ज्ञानवान् वा घटानयनगोचरं प्रवृत्तिमत्त्वात् अत्र कार्यकारणभावग्रहरूपानुकूलतर्कप्रमाणप्रवृत्तिसमयेऽपि संसर्गग्रहात् पदार्थव
र्गचाचयः साक्षात्कृतिर्दुःखं चापवर्गो कार्यान्वितेशक्तिं कुत्पादयति। तथा हीति। प्रयोजकवाक्यं श्रुत्वानन्तरं प्रयोजकस्य घटमानयेत्यादिवाक्य
श्रवणानन्तरं प्रयोज्यस्य प्रवृत्तिमुपलभमानः प्रयोज्यवृद्धस्य घटानयनादौ प्रवृत्तिमुपलभमानः ज्ञात्वा घटपदादवगतीतशक्ति
कः। तत्प्रयोजकतया घटानयनादिगोचरप्रवृत्तिप्रयोजकतया कार्यतावैशिष्ट्यं ज्ञानमनुमितेति। अनुमानप्रकारस्तु। अयं प्रयोज्यवृ
द्धः कार्यतावैशिष्ट्यं घटानयनज्ञानवान् घटानयनविशेष्यकं कार्यतात्प्रकारकं पदार्थः पदार्थसंसर्गभावग्रहाभावादिति यथा
ता आप्तवचनविज्ञानशंकते। ननु सर्वेषामिति। कार्यत्वान्वितं वाचकत्वात् तद्वाचकेति कार्यतावाचकेत्यर्थः अत्रप्रमाणं शाब्द
मानजनकत्वाभावः प्रथमवादे वाक्यघटकीभूतशब्दानामपि कार्यतावैशिष्ट्यं वाचकत्वादिति भावः। तत्र तयोः शक्त्योर्मध्ये कार्य
त्वान्वितेसाक्षात्परया कार्यतावैशिष्ट्ये कार्यतावैशिष्ट्यं शाब्दबोधजनकत्वनिर्वाहिका शक्तिः पदस्यर्थः। तथा च कार्यत्वे घटादि
पदस्य एवं सर्वेषां पदानां कार्यत्वान्वितशक्तिकल्पनेऽर्थवादरूपाणां कार्यत्वोपस्थापकपदासमभिव्याहृतानां श्रुतिवेदः। स्मृति
मनुयाज्ञवल्क्यादिः इतिहासरामायणादिः पुराणविष्णुपुराणं प्रामाण्यं प्रमाणप्रमाणजनकत्वाभावः। तथा चेति। श्रुत्यादी
नां प्रामाण्यप्रसंगे चेत्यर्थः। मिश्रैः वाचस्पतिमिश्रैः। तस्मादिति। पुरुषमुत्पश्यामहे इति योजना। तस्माद्दुःखाद्दोषग्रस्तमतप्रयो
जकत्वात् इति शंकार्थमाह। एवमित्यादि। एवं वदन् श्रुत्यादीनां प्रामाण्यं वदन्। वर्णा अत्यासेति। वर्णा येषां कथोर्ध्वत्यासः स्थाः
नेकः कस्यानेरः। इत्येवं रूपः। लिपिसाम्यं यत्। तकारसादृश्यं भकारे। इदं च जो ज्ञात्वा। मिथ्यानान्तरेच संभवति। नो गतान्तरेच श्रुतौ
रेव भकारे संभवति। न त्वन्यादृशभकारे। तकारी। शब्दस्य सह कारी। गंगापदस्त्रीरत्वयोनस्यादिति। तीरं गंगापदस्य शक्तेरभा
वादित्यर्थः। तत्त्वेन शक्तित्वेन वृत्तित्वेन शक्तिभक्तगान्यतरत्वेन। इयं शाब्दबोधप्रयोजिका लक्षणानाम। नाम्नालक्षणापदवा
च्येति यावत् वृत्तिः काकिस्वरूपा। शक्याद्दशक्योपस्थितिरिति। शक्योपस्थितेर्शक्योपस्थितिरित्यर्थः। गंगायां घोष इत्या
दौ प्रथमतो गंगापदात्प्रवाहोपस्थितिः। प्रवाहोपस्थितेस्तीरोपस्थितिरिति सीत्यो सर्वत्र शक्याद्दशक्योपस्थितिर्वा ध्वा। ननु सेव
नतूपस्थितिरेव वृत्तिरित्यर्थः॥ वृत्त्यापरजन्यपदार्थोपस्थितेः शाब्दबोधहेतुत्वं। ननु वृत्त्यात्मकपदार्थोपस्थितिरिति भावः
॥ अन्वयेऽपि अशक्येऽन्वयेऽपि। नच शक्ये प्रकारविशेष्ये तात्पर्यस्य लक्षणात्वं स्वीक्रियते। अतोऽन्वये तात्पर्यस्य लक्षणा
त्वमत आह किंचेति। तात्पर्यस्य निर्वाहिका वृत्तिः शक्तिर्लक्षणा च

॥६॥ भा॰ संबंधे लक्षणाभावप्रसंगेपि राजसंबंधः पुरुष इतिवत राजसंबंधः पुरुष इत्यत्रैव अन्वयः स्यात् राजपुरुष इत्यत्रापि अन्वयः
स्यात् इति तेतोः। तद्वैषम्यादेव स्यात् षष्ठ्यर्थलाभावे रूपदोषतादेव स्यात् शक्तिविरहे गमे पुरुषात्मकसमुदाये शक्ति
विरहे ननु राजपुरुषसमुदाये शक्त्यभावे लक्षणायां किंवा बाधकमित्यतआह। स्वशक्त्येति। तथा च लक्षणायाः स्वशक्ति
घटितत्वात् स्वशक्त्यभावे लक्षणाया अप्रसंभवइति भावः। ननु पक्षेतेऽवेत्यादिशंकायां समाधानमाह। उच्यतइ
ति तथा च राजपदस्य राजसंबंधिलक्षकत्वे च नचैवमिति। एवं लक्षणायां राजपदार्थस्य राजसंबंधिनः पुरुषपदार्थ
नपुरुषेणासतभेदान्वयेकर्मधारयापत्तिः राजपुरुषइत्यादौ कर्मधारयसमासापत्तिः। समासपूर्वदशायां तुल्यार्थ
त्वाभावात् एकधर्मिबोधकत्वाभावात् तथा च यत्र विग्रहदशायां तुल्यार्थकत्वं तत्रैव कर्मधारयइति भावः
। तुल्यार्थषष्ठ्यैव राजपुरुषइत्यादौ अनुसंधीयमानतुल्यार्थषष्ठ्यैव अन्वयसंबंधे तथा च राजपदार्थः षष्ठ्य
संबंधे षष्ठ्यर्थः संबंधः पुरुषपदार्थे पुरुषे प्रकारतयाभासते नामार्थयोर्न परस्परमन्वयइति भावः। षष्ठीलो
पमजानतः राजपुरुषइत्यादौ राजपदोत्तरषष्ठीलोपमजानतः पुरुषस्य तु राजपुरुषइत्यादौ अन्वयप्रत्ययः संसर्गप्रत्यय
यः। शक्तिभ्रमात् राजपुरुषइत्यादिसमुदाये शक्तिभ्रमात् ननु राजपुरुषात्मकसमुदाये शक्त्यप्रसिद्ध्या न तद्भ्रमः संभवती
त्यतआह राजपुरुषलक्षणायां वेति। राजपदस्य राजसंबंधिनि लक्षणायां वेत्यर्थः। यद्वा शक्तिभ्रमादित्यस्य शक्तिसंबंधे
न राजपुरुषात्मकसमुदायभ्रमादित्यर्थः क्रियतेऽनया प्रसिद्धिः। कीर्यते कुरित्यनेनाव्यवस्थोद्भावनं। तदीयं तु षष्ठीलोपा
जानद्दशायां राजपदलक्षणाया एव कल्पे सर्वदैव राजपदलक्षणायान्वयबोधः। तत्तुल्यं षष्ठीति वक्तुं तत्तु राजपुरुषइ
त्यादौ पुरुषपदस्यैव राजसंबंधविशिष्टपुरुषे लक्षणा राजपदात्पर्यग्राहकं तथा च समासजन्यबोधविग्रहवाक्य
जन्यबोधयोः समानाकारत्वमपि संभवति नान्यर्थेति धेयं समासस्य शब्दसमुदाये पराजपुरुषात्मकशब्दस
मुदायविशिष्टार्थे राजसंबंधविशिष्टपुरुषात्मकविशिष्टार्थे नचैवमिति। एवं राजपुरुषात्मकशब्दस
मुदायस्य राजसंबंधविशिष्टपुरुषात्मकविशिष्टार्थे शक्तिस्वीकारे अविदुषोपि अजानतोपि समस्तशा

क्तिग्रहः समासस्य शब्दसमुदायशक्तिग्रहः। अनुशासनात् समासेखलु भिन्नैव शक्तिः पंकजशब्दवत् इत्याद्यनुशास
नात् सप्तमर्थः पदविधिरित्यनुशासनाच्च तदर्थ अत्र समर्थः पदविधिरित्यत्र परमुद्दिश्य पदोविधीयते समासादि
समर्थः विग्रहवाक्यार्थाभिधाने शक्तः साधुरिति अनुशासनग्रहः। निरुक्तानुशासनग्रहः संभवतीति नचैवं
एव शब्दग्रहेतसमासे खलु भिन्नैव शक्तिरित्यनुशासनग्रहे किं बाधकमिति वाच्यं अवयवशक्त्यग्रहे अवयवश
क्तिभिन्नैव शक्तिरित्यनुशासनस्य यथासंभवात् अभावज्ञानेप्रतियोगिज्ञानस्य हेतुत्वात् एवमपि अवयवशक्त्य
ग्रहे समर्थः पदविधिरित्यनुशासनग्रहोपि न संभवति अवयवशक्तिग्रहस्य विग्रहवाक्यार्थज्ञानहेतुत्वात् तथा
च समासस्य शक्तिग्रहस्य विग्रहवाक्यार्थज्ञानहेतुः। समस्तेत्यादिसंभवतीत्यंतः। इतीति इतिहेतोरित्यर्थः। तच्छक्तिग्रहस्य अवयवशक्तिग्रहस्य
समुदायशक्तिग्रहहेतुत्वात् अनुशासनग्रहस्य समुदायशक्तिग्रहप्रयोजकत्वात् अवयवलक्षणायां वा पक्षे
जपदार्थे राजसंबंधाद्यैलक्षणयैव राजसंबंधिपुरुषशब्दबोधोपपत्तौ समुदायशक्तौ राजपुरुषात्मकसमु
दायशक्तौ मानाभावात् प्रमाणाभावात् राजपदोत्तरपुरुषपदस्य न शक्तिः तावच्छब्दकशक्तितावच्छेदकत्वप्रकारकप्र
मितिविषयत्वाभावात् इत्यत्रतात्पर्यं तेन समुदायशक्तेरप्रसिद्धावपि न क्षतिः। नन्वनिरुक्तो हेतुरसिद्ध इत्यतआह तदुक्ति
रिति। वक्ष्यतिरिति शेषः। परिति पूरणीयं तथा च वक्ष्यते तदुक्तं यतेजहत्स्वार्थाजहत्तत्रैव यत्र रूढिर्विशेषिणीत
। अयं
वातदुक्तमिति तत्र राजपुरुषइत्यादिसमुदाये शक्त्यभावे तदुक्तं वक्ष्यते तदुक्तं तत्र जहत्स्वार्थाजहत्तत्रैव यत्र रूढिर्विशेषिणीत्य
नेन जहति स्वानि पदानि यं स जहत्स्वः जहत्स्वः अर्थो यस्याः सा जहत्स्वार्था। एतादृशी रूढिस्तु तत्रैव स्वीक्रियते इति
शेषः। यत्र रूढिर्विशेषिणी। अवयवार्थतावच्छेदकविशेषिणी तथा च राजपुरुषात्मकसमुदायस्य राजसंबंध
विशिष्टपुरुषे रूढिः अवयवार्थतावच्छेदकविशेषिणी भावात् किंतु अस्य कर्मधारयसमुदायस्योपस्थितिव
शेषः रूढिः स्वीक्रियतएव अस्य कर्मधारयत्वमुद्दिश्य यत्र रूढ्यवयवार्थतावच्छेदकविशेषात् एतच्चात्र स्प
ष्टं तथाहि जहत्स्वार्थाजहत्स्वार्थे हेत्वन्ते ते पुनस्त्रिधा भेदः संसर्गोऽभयं चेति वा अवस्थितेः। जहति स्वानि
पदानि यं स जहत्स्वः जहत्स्वः अर्थो यस्याः सा जहत्स्वार्था पदवेत्तीनां तद्धितो पदानामानर्थक्यमित्यर्थः

अयमभावः। समासशक्त्यैव गवादिविशिष्टपुरुषभानसंभवेन राजपुरुषपदयोरपि न लक्षणा दोषकत्वं कल्प्यं वृषभयावका
दिपदानामिव। अन्यथा राजपदेन विग्रहवाक्यस्थराजः स्वामी तत्रैव स्थितिः स्वस्वामिनः पुरुषस्य स्वस्मिन्
राजपुरुषस्य स्वस्वामिनः। अतः कथमिति। न जहति पदानि स्वार्थं यस्मात्सा अजहत्स्वार्था अयमभिप्रायः।
राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः कल्प्या कार्यभावात्। तत्र राजादिपदादेव स्वार्थोपस्थितिसंभवेन कल्प्यनस्य
स्वपरार्थत्वात्। अतः शक्तिः त्यागोऽप्रामाण्यं कः तथा च कौलादिवत् शक्त्यैव विशिष्टार्थबोधः। अ
यमेव व्यपेक्षापत्तिमतां तरस्वेन भाष्यकारैः कः। न चेत्समासे राजपुरुषादिसमासे रूढ्येति विशेषणान्वया
पत्तिः सविशेषणानां नान्वयः निर्वृत्तस्य वा विशेषणयोगो नेति वार्तिकारणं तत्कल्प्यानुसारेण तद्रूढ्यजहत्
स्वार्थत्वादिति। तस्मात्समुदायशक्तौ मानाभावात्। अन्यथोपपत्तौ अवयवशक्तेः समुदायेऽपपत्तेः स्यादेतदिति
॥ एतदसमीचीनं स्यात्। भवेत्। चित्रगुः स्वामिनीति पाठस्तु प्रामादिकः। चित्रगवस्वामिनिवेति पाठस्तु युक्तः
गोतात्पुरुषात्गोरत्र किरन्तु कीत्यनेन सूत्रेण टच्प्रत्यातात्र चित्रगुसमुदाये चटकपदे। नाद्यः॥ गोपदं
गोस्वामिलक्षकमिति प्रथमं कल्प्यो न तस्य गोः पदार्थैकदेशत्वात्तो स्वामिनः पदस्यार्थैकदेशत्वात्। अ
सत्वपदार्थैकदेशत्वादेव। इदं च गवान्वयापत्तेरित्र हेतुः। अथवा अत एव वस्त्रमात्रादौ वादेव। नांत्योपि
चित्रपदं चित्रस्वामिलक्षकं इत्यं त्यक्तव्योपि न। गवान्वयापत्तेः। चित्रगवान्वयापत्तेः। गोपदं तु तात्पर्य
कमिति॥ इत्यस्यापवादकं शक्यत्वादित्यर्थः। विनिगमनुमिति। एकतरपक्षपातयुक्त्या वोजयितुमित्यर्थः। तथा
चगोपदस्य चित्रगवीस्वामिलक्षकत्वाभावे हेतुर्विनिगमनुमशक्यत्वादिति। अत्रेदं चिन्त्यं चित्रगुमानयेत्यादौ गो
पदस्य चित्रगवीस्वामिलक्षणाचित्रपदं तात्पर्यग्राहकमिति कल्प्यं एव सम्यक्। विभक्त्यर्थान्वयानुरोधा
त्। चित्रपदस्य चित्रगवीस्वामिलक्षणागोपदं तात्पर्यग्राहकमिति कल्प्यं तन्न सम्यक्। विभक्त्यर्थान्
न्वयप्रसंगात्। तथा च विभक्त्यर्थान्वयत्रयविनिगमकसत्त्वात् गोपदं एव चित्रगवीस्वामिलक्षणेति मा

तांतरमाह। तस्मात्। तस्मात्गोपदचित्रपदनिष्ठात्तं विनिगमकाभावादेकतरपक्षपातिपुक्त्यभावात्। समुदाये चि
त्रगुसमुदाये। शक्तिरेवेति। एवकारेण चित्रगुसमुदाये चटकपदे लक्षणाव्यवच्छेदः। पदद्वये गोपदे चित्रप
दे च नतु समुदाये नतु चित्रगुसमुदाये। अन्यलभ्यत्वात् चित्रगवीस्वामिनोर्लक्षणान्यत्वात्तल्लक्षणान्यभ्यनि
त्रगवीस्वामिकत्वादिति यावत्॥ समुदाय एव चित्रगुसमुदाय एव। तत्र लक्षणा चित्रगवीस्वामिनिलक्षणा। वा
स्यापि चित्रगुरिति वाक्यस्यापि। विशिष्टं चित्रमित्रागोः अन्यथा वाक्येन लक्षणानेकीकारे कागतिः। न पदेन
लक्षणानिर्वाहः। नाहतीरं गभीरमिति। नन्वनदीतिपदस्य नदीतीरे लक्षकत्वेन घोगभीरान्वयः संभवती
ति वाच्यं। तथापि नघोः पदार्थैकदेशत्वेन गभीरान्वयासंभवात्। तस्मात्पदद्वयलक्षणापि संभवात् अत
नदीबोधकत्वं नानुपपन्नमत आह। बोधकत्वेवेति। गभीरयोर्न दीति भागस्य गभीरमित्रनदीबोधकत्व
वत्पर्थः। तथा च बोध्यसंबंधस्तीरसंभवतीति भवः। लक्ष्ये गभीरपदस्यान्यत्र गभीरनदीतीरे विभक्त्य
र्थान्वयापत्तेः गभीरनदीतीरे नदीपदोत्तरसप्तमीविभक्तेः प्रकृतिः। न दीपदोत्तरसप्तमीविभक्त्यान्व
यः स्यात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरिति भावः। नन्वनदीतीरे गभीरयोर्न दीति भागस्य
नदीपदोत्तरसप्तमीविभक्तिप्रकृतित्वाभावेपि नदीपदरूपतादृशविभक्तिप्रकृतिपदितत्वमस्त्येव तथा
च प्रत्ययानां प्रकृतिपठितार्थान्वितस्वार्थबोधकत्वव्युत्पत्तिरेव स्वीक्रियते॥ अथ तीरे गभीरयोर्न दीति भागस्य
स्थे गभीरनदीतीरे नदीपदोत्तरसप्तमीविभक्त्यर्थान्वयानुपपत्तिरत आह। गभीरयोरिति॥ सप्तम्यनापत्तेः अथ
गभीरपदस्य नदीपदस्य चलिरर्थकत्वेन विशेष्यबोधकपदेन सहैकार्थत्वाभावात् सप्तमीविधायकानुशासनाभा
वादिति भावः। विशे[illegible] ष्यतो विभक्तिविधायकमनुशासनं च विशेष्येण सहैकार्थत्वाभावात् सप्तमी

भवेत् यत्र विशेषणी तत्र लिंगादयः आपोविशेष्यस्य विशेषणो लिंगादयः इत्यत्रादिपदेन संख्याविभक्तयोः
परिग्रहः लिंगसंख्याविशेषणविशेष्यताविभक्तिः पुनरेके विशेषणविशेष्यो रित्यादित्यादिकं बोध्यं
विभक्त्यंतभागस्यैवेति गभीरायां नद्यामिति भागस्यैवेत्यर्थः नतु विभक्तिरहितस्य गभीरायां नदीति भाग
स्येत्यर्थः अप्रयोजकत्वादिति। गभीरायां नद्यामिति भागस्य प्रयोजकत्वादित्यर्थः॥ अत्र यद्यपि गभीरायां नद्या
मिति वाक्ये प्रत्ययभावेपि स्ववोध्यसंबंधत्रयानन्तर्यसंभवत्येव स्ववोध्यावाः नद्याः परं परसं
बंधस्य तीरस्य प्रत्ययेपि सत्वात् तथापि स्ववोध्यसंबंधोलक्षणोत्र स्ववोध्यत्वं परिस्वतन्त्रवोध्य विष
यत्वं तदाकारत्वादिसंबंधेन घटपटस्मरितगमनादेः संबंध्यग्रहपस्थितस्य घटादेः अन्वय
वोध्यापत्तिः। परश्चस्वतन्त्रवोध्यविषयत्वं तदा गंगापदेन तत्तीरस्य विरहत्रसंगः तेन गंगापदेन पृथि
वीतशब्दवोध्यानन्तरं वृत्तिमत्वेनैव पदस्य वोध्यकत्वेनान्योन्याश्रयप्रसंगश्च। तस्माद्वृत्तिमत्वे
वोध्यत्वं वाच्यं। तदभिप्रायेणाह क्रमशक्तत्वादिति। तथा चैकशक्तिभावात् शक्त्या स्ववोध्यसंबंधत्रय
नन्तर्भावः क्रमशक्तत्वादिति भावः। तस्माद्गभीरायां नद्यामिति वाक्ये लक्षणया अप्रसंभवात् पदद्वय
एव गभीरपदेन नदीपदेन च। विनिगमकाभावात्। एकतरपक्षपातपुरस्कारभावात्। विशिष्टनदीतीरे
गभीरनदीतीरे। न चैकपदवेद्यत्वमिति भावः। परस्परतात्पर्यग्राहकत्वादिति। गभीरपदस्य
विशिष्टनदीतीरे लक्षणायां नदीपदं तात्पर्यग्राहकं। नदीपदस्य विशिष्टनदीतीरे लक्षणायां
गभीरपदं तात्पर्यग्राहकमिति। संप्रदाय इत्यस्य स्वरसोद्भावनं तद्बीजं तु चित्रगुरित्यत्र चित्रपदं चि
त्रगवीसंबंधि परं गोपदं गोस्वामिपरं गोपदार्थिस्वामिनि चित्रगुसंबंधि न स्वातंत्र्येनान्वे

पः संभवत्येव एवं गभीरायां नद्यामित्यत्र गभीरपदं गभीरनदीसंबंधिनि लक्षणाकं। नदीपदं च तीरे लक्ष
णाकं तथा च गभीरनदीसंबंधिनि तीरे घोषइत्यन्वयवोध इति सर्वपदानां सार्थकत्वेन नकाप्य
नुपपत्तिरिति। ननु प्राप्तमुदकं यमसौ प्राप्तोदकोग्राम इत्यादिवद्द्वौ प्राप्तोदकपदसोदककर्तृक
प्राप्तिकर्मणि शक्तिरेव रूपकी॥ अन्यथा प्राप्तपदस्य तात्पर्यग्राहकतया उदकपदस्य प्राप्तिकर्मणि
प्रोदकसंबंधिलक्षणया प्राप्तिकर्मणि प्रोदकसंबंधी ग्राम इति बोधोपपादनेपि उदककर्तृकप्राप्ति
कर्मग्राम इति सर्वजनानुभवसिद्धबोधोनुपपन्न एव नचैवं प्राप्तेत्र कृत्प्रत्ययस्य कर्तरि विहितस्य
कर्मणि लक्षणया उदकप्राप्तिकर्मग्राम इति बोधोनानुपपन्न इति वाच्यं। समानाधिकरणप्राप्तिपदिका
र्थयोर्भेदान्वयस्य युक्तत्वेन उदकाभिन्नप्राप्तिकर्मेति बोधः स्यात्। अन्यथा समानाधिकरणप्राप्तिप
दिकार्थयोर्भेदान्वयस्य युक्तत्वभंगापत्तिः। न च समानाधिकरणप्राप्तिपदिकार्थयोर्भेदेनान्वय इत्येव
युक्तत्वापत्तिः। प्रकृते च न प्राप्तिपदिकार्थयोर्भेदोन्वयः। किंतु धात्वर्थप्राप्तौ कर्तृतासंबंधेन प्राप्तिप
दिकार्थोदकस्यान्वय इति वाच्यं। धात्वर्थप्राप्तिपदिकार्थयोरभेदेनान्वयस्य युक्तत्वात्
। अन्यथा एवं दत्तः पचतेओदन इत्यत्र कर्तृतासंबंधेन दत्तस्य पाकेऽन्वयसंभवेन निराकांक्षत्वा
नापत्तेरित्यत आह। विस्तरस्तु। तदर्थं अप्राप्तोदकोग्राम इत्यत्र धातूदककर्तृकप्राप्तिपरः तो
प्रत्ययः कर्मत्वपरः। उदकपदमाश्रयपरं। तथा चोदककर्तृकप्राप्तिकर्मत्वाश्रयो ग्राम इत्यन्व
यबोधः। यद्वा उदकपदं उदककर्तृपरं। तस्य च धात्वर्थप्राप्त्याश्रयभेदेनान्वयः कृत्प्रत्ययः कर्म
परः। एवं चोदककर्तृकप्राप्तिकर्मग्राम इत्यन्वयबोधोनानुपपन्न इति। प्राप्तमसीचिनि वंधता

कुंभ उत्तरपदलक्षणायेवेति। उपकुंभमित्यव्ययीभावे उपपदं तात्पर्यग्राहकं कुंभपदस्य कुंभसमीपलक्षणा
सर्वदीपिकयोरिति। मणिश्रिंतामणिलक्षणमरीचिः टीकानिबंधो न्यायनिबंधस्तस्य तीत्यर्थदीपिकाटी
कातयोरित्यर्थः॥ अर्द्धपिप्पलीत्यादितत्पुरुषे अर्द्धपदं तात्पर्यग्राहकं पिप्पलीपदस्यापि पिप्पल्यर्द्धलक्ष
णायेत्यर्थः। उपपदो कुंभसमीपस्यापि पिप्पल्यर्द्धस्य च बोध्यो पपदो न शक्तिः उपकुंभसमुदाये अर्द्धपिप्प
लीसमुदाये च न शक्तिरित्यर्थः॥ अन्यत्रभ्यत्वोत्पत्तिलक्षणायान्यत्वात्। कुंभसमीपस्यापि पिप्पल्यर्द्धस्य
चेति शेषः। ननु लक्षणायापादपदार्थे पादसमाहारे शक्त्या पाणिपदार्थस्य पाणौ भेदेनान्वयो
न संभवति। नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात्। नाप्यभेदेनान्वयः अदृष्टत्वादतआह।
पाणिपदं पाणिप्रतियोगिकमात्मलक्षणवतीत्यग्रिमेणान्वयितया चाभेदेनान्वयः। न पाणिपाद
समाहारे शक्तिरिति। पाणिपादसमुदायस्य विशेषः ननु सम्यगाह्रियतइति समाहारः पादस्य समा
हारः पादसमाहारः इति व्युत्पत्त्या पादसमाहारः पादक्रियाविशेषः तत्र च पाणिप्रतियोगिकत्वाभावा
त्तत्र लक्षणापि पाणिपदार्थस्य पाणिप्रतियोगिकस्याभेदेनान्वयो व्युत्पन्न इत्यत आह। समाहरश्चे
ति। अथवा समाहरणं समाहारः अनेकस्य एकीकरणं अनेकस्यैकोधर्म इति यावत्। स च धर्मो
द्रव्यत्वे सत्त्वे च भेदेऽस्त्वारिरपि न चेत्तत्प्रतीतिः पाणिपदादावनुभवसिद्धत्वत आह ~~अथेति~~ अथवा
~~समाहरणं समाहारः अनेकस्य एकीकरणं अनेक~~ समाहारश्चेति। तुल्यवदेकक्रियान्वयि च रूप
मिति तुल्यवदतीति तुल्यव्यापारवतोः पदार्थयोरेकक्रियान्वयि च रूपमित्यर्थः पाणिपादद्वि
धीत्यत्र द्विधानुकूलो यावान् व्यापारः स पाणेः पादस्य च तुल्यएवेति भावः यत्र चैत्रः का
ष्ठमात्रं मलानसि पति मैत्रस्तु काष्ठं दे पादीन्न व कुरुत्रापाद्दा॥ न्करोति तत्र चैत्रे रामे मैत्रः प

वर्तीत्येव प्रयोगः तत्र चैत्रमैत्रौ पचतइति प्रयोगवारणायतुल्यवदिति। ननु पाणिपादद्विधीत्यादेः पाणि
पादे क्रियान्वयात् पूर्वं तुल्यवदेकक्रियान्वयित्वरूपसादृश्यात्मासमाहारोऽस्त्वेवाप्रतीतेश्चातश्चोक्तं॥ सेना
वनादिवदिति। सेनावनत्वादिवदित्यर्थः अपेक्षाबुद्धिविशेषविषयत्वं अपेक्षाबुद्धिविशेषविशे
ष्यत्वं। तादृशबुद्धिविषयतायाः पाणिपादादावतिप्रसक्तत्वात् बुद्धौ विशेषत्वं पदयोर्ये षां वा समाहार
स्तन्मात्रविशेष्यकत्वं तथा च सेनात्वं वनत्वं पदयोरपेक्षाबुद्धिविशेषत्वं विशेष्यत्वं तथा समाहारो
पीतिभावः। अथवा सेनावनादिवदिति सेनावनादिवेत्यर्थः। तथा च सेनावनादेः पदयोः सेनात्वे व
नत्वे च पेक्षाबुद्धिविशेषविषयत्वरूपं तथा समाहारोऽप्यपेक्षाबुद्धिविशेषविषयस्वरूपएवेति भावः।
नन्वेवमिति। एवं पादपदस्य पादसमाहारलक्षणायां पाणिपादं वादयेत्यत्रेति पाणिपादं वादयेत
वाक्ये च टकीभूतपाणिपादपदार्थे पाणिप्रतियोगिकपादसमाहारेऽन्वयः। वादनकर्मत्वा
न्वयः कर्मत्वान्वयो बोध्यस्याप्यतिभावतानन्तु कुतोमन्वय इत्यत आह। समाहारे वादनकर्म
त्वाभावादितीति। तथा चायोग्यत्वादनन्वयइति भावः। परंपरयेति॥ स्वाश्रयवृत्तिसंबंधेनेत्यर्थः
। तत्र पाणिप्रतियोगिकपादसमाहारे कर्मत्वान्वयादिति। अभिघातात्मकसंयोगावच्छिन्नक्रिया
त्मकदाहकर्मत्वान्वयादित्यर्थः। तथा चाभिघातात्मकसंयोगरूपे पक्षात्वर्थे तावच्छेदकं फलं तत्पा
श्रयवृत्तिरूपपरंपरासंबंधेन पाणिपादसमाहारोऽन्वेतीति भावः। यथा मृगं पृथ्वी चलतीत्यादौ
पृथ्वीपदं परंपराचलनान्वयः पृथ्वीपदस्याप्यवयवाश्रयत्वात् अतएव तदेकत्वान्न च एकवचनं
एकइत्यत्र संख्यानं तु पाणिपादं वादयेत्यत्र पाणिपादे वादनकर्मत्वान्वयानुभवस्य न संभवसिद्ध

[illegible]

[illegible]

[illegible]

[illegible]

तत्र नीलकोपस्थापकत्वं भावात्। नीलाभेदस्य नीलगुणाश्रयतादात्म्यस्याश्रयविशेषणत्वे सर्गमर्यादयैव। अवभासनोपपत्तेः। शाब्दबोधोपपत्तेः योग्यतानादिरूपकोरणावलादितिभावः। कर्मधारयेनशक्तिः। नीलोत्पलेत्यादिसमुदायेनशक्तिः। नवान्तलक्षणेति। नीलोत्पलेत्यादिसमुदाये नीलोत्पलेत्यादिसमुदायघटकपदेवा नञ्तत्पुरुषः। अत्रैवं यद्यपि नीलपदस्य नीलगुणाश्रये लक्षणावश्यकी नीलपदस्य नीलगुणपरत्वे उत्पलपदार्थेनसहाभेदासंभवेन कर्मधारयासंभवः तथापीयं लक्षणा नसमासप्रयुक्ता अपितु भिन्नाभिन्नाभिन्नपदेन सह समासः। अतएव कर्मधारयनञ्तत्पुरुषविरहादेव। ननु तत्पुरुषस्य कुतो गुरुत्वमत आह। तत्र हीति। तत्र राजपुरुष इत्यादितत्पुरुषसमासे। पूर्वपदे राजादिपदे। संबंधिनि राजादिसंबंधिनि लक्षणोत्पुक्तं पूर्वमुक्तं घटसंबंधि परं प्रतियोगितासंबंधेन घटसंबंधि परं अन्योन्याभावे शक्तमेवेति। अन्योन्याभावेपि शक्तमित्यर्थः। लाघवेनान्योन्याभावं छेदकतयेति शेषः। ननु संसर्गभावत्वेनान्योन्याभावभिन्नाभावत्वं किंचतिरिक्तमखंडोपाधिरूपं तदपि तथा तादात्म्यसंबंधावच्छिन्नप्रतियोगितामात्रं वा। ~~मध्यतिरिक्तमखंडोपाधिरूपं~~ रूपमन्योन्याभावत्वेनलाघवतश्चाविशिष्टगमनाविरहेणाचेति। संसर्गभावत्वस्य खंडोपाधिरूपत्वे अन्योन्याभावत्वमप्यतिरिक्तमखंडोपाधिरूपमेव स्वीकृतं। तथा च विनिगमनाविरहेण संसर्गभावत्वस्य [illegible] मन्योन्याभावत्वं चोभयमेव नञ्पदशक्यतावच्छेदकमिति भावः। अथ वा लाघवेन संसर्गभावत्वापेक्षयाऽन्योन्याभावत्वस्य लाघवेन नञ्पदशक्यतावच्छेदकतयेति शेषः। ननु भावत्वस्य नञ्पदशक्यतावच्छेदकत्वे भिन्नाभावत्वे रूपसंसर्गभावत्वापेक्षयाऽन्योन्याभावत्वस्य लाघवेनान्योन्याभावत्वस्यापि नञ्पदशक्यतावच्छेदकत्वेन नञ्पदादभावत्वेनरूपेणाबोधः स्यात् नत्वन्योन्याभावत्वेन संसर्गभावत्वेन वा नवेष्टापत्तिरिति वाच्यं। भूतले घटो नास्ति घटः पटो नेत्यादिवाक्यजन्यबोधानंतरं भूतले घटसंसर्गभाववन्न वा घटः पटभेदवन्न वेति संशयापत्तेरित्यत आह। विनिगमनाविरहेणाचेति। अखंडोपाधिरूपसंसर्गभावत्वस्याखंडोपाधिरूपान्योन्याभावत्वस्य च नञ्पदशक्यतावच्छेदकत्वे विनिगमनाविरहेणाचेत्यर्थः। अभावमात्रस्य संसर्गत्वान्योन्याभावयोः। तच्छक्यत्वावधारणात्। नञ्पदशक्यत्वावधारणात्। न घटः पट इति वदति। न घटः पटस्य न वेत्यर्थः। अघटः पट इत्यत्रापीति। अविना नञ्पदसमुच्चयः। तस्मान्योन्याभावशक्यत्वेन लाघवेनाकृत्वाभावात्। नामार्थयोः प्रातिपदिकार्थयोः अभेदान्वयस्य अभेदतादात्म्येनान्वयस्यैवव्युत्पत्तेराकांक्षाजनकत्वात्। तथाहि। नामार्थनिष्ठाभेदसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबोधे प्रतिपत्तव्यमिन्नपदजन्योपस्थितिविशेष्यतासंबंधेन तेन नामार्थनिष्ठाभेदातिरिक्तसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबोधे प्रतिप्रत्ययजन्योपस्थितिविशेष्यतासंबंधेन हेतुः। अतो नञ्नामार्थयोर्भेदेनैवान्वय इति भावः। ननु घटस्य घटप्रतियोगिकेन तत्तत्पदार्थयोरन्वयात्। तथा च वाक्यं घटः पटो नेति प्रथमपदोत्तरप्रथमार्थयोः षष्ठ्यर्थः षष्ठ्यर्थप्रतियोगितानिरूपितसंबंधतादिसुपविभक्तेस्तत्तत्पदार्थानंगीकारे षष्ठीतः कर्मतात्ययः स्यात्। ओदनस्य भोक्ता इत्यादौ षष्ठीतः कर्मतात्ययः इत्यर्थः। ननु संबंधसामान्ये शक्तायाः षष्ठ्याः कर्मतायां नञ्तत्पदार्थकिंचिदंशस्य कर्मतायां अपि संबंधत्वादत आह। कथं चेति। प्रतिबंधिनाकुल्यप्रदर्शनायां वाह। कथं चेति। एकस्मिन्नपि बहुवचनमिति तत्र बहुत्वाबाधादेकत्वे बहुवचनस्य लक्षणेति भावः

अनुशासनिका कर्तृकर्मणोः कृती त्यापनुशासनमिति द्वाविमौ लक्षणाषष्ठ्याः कर्मतायां लक्षणावुक्तौ चन्नैकै
चिल्लक्षणा तुल्यमिति। यथा षष्ठ्याः कर्मतायां लक्षणा अनुशासनिकी तथा प्रथमायाः षष्ठ्यर्थे लक्षणाप्य
नुशासनित्येव। ननु षष्ठ्याः कर्मतायां लक्षणानियामकमनुशासनं कर्तृकर्मणोः कृतीति सूत्रं स्पष्टमेव।
प्रथमायाः षष्ठ्यर्थे लक्षणानियामकमनुशासनं किमित्यत आह॥ तदिदमाहुरिति॥ वैयाकरणा इति शेषः
तथा च वैयाकरणास्तत्र प्रथमायाः षष्ठ्यर्थे लक्षणानियामकमनुशासनं किमित्यत आह। तदिदमाहुरिति।
वैयाकरणा इति शेषः। तथा च वैयाकरणास्तत्र प्रथमायाः षष्ठ्यर्थे लक्षणानियामकमनुशासनमिद
दं वक्ष्यमाणमाहुः। अनुशासनमेव दर्शयति। नियतप्रयोगादिति नियतः प्रथमो तपदसम
भिव्याहारनियतः प्रयोगो येषां ते नियतप्रयोगाः। ते आमयमाणयः। नघटः पट इत्यादौ भूतलेन घटस्या
दौ चेन्न परं प्रथमो तपदादि पदसमभिव्याहारो वक्तुं शक्यते न षष्ठ्यन्तपदादि पदसमभिव्याहारेण घ
टस्य पट इत्यस्य भूतलेन घटस्येत्यस्य चाप्रयोगात् तथा घटस्याभाव इति प्रयोगः साधुः तथा घटस्य तद्
ति प्रयोगो नसाधुरित्यष्टो वर्ग्यं तथा च नियतप्रयोगादिति कैश्चिदन्यथा इत्यनुशासनमेव प्रथमायाः षष्ठ्य
र्थे लक्षणानियामकमिति। तथापि घटपदस्य घट प्रतियोगिके प्रथमायां वा षष्ठ्यर्थे लक्षणा स्वीकार्या
पुनः अर्थघटयोः नघटः पट इत्यत्र नञर्थघटयोः कथमाश्रयाश्रयिभावेनान्वयः इति नामार्थयो
र्भेदेनान्वयस्यानुपपन्नत्वादिति भावः। षष्ठीतोपं नघटः पट इत्यत्र नञुत्तरं षष्ठीलोपं। ततः नघटः
पट इति वाक्यात् अर्थप्रत्यायनं नञर्थपदार्थघटपदार्थयोः संसर्गप्रत्यायनात् अभावत्वं लक्षकमि
ति। अन्योन्याभावत्वं लक्षकमित्यर्थः। तथा च नञर्थदार्थैकदेशे अन्योन्याभावे। तस्य अभावस्य पद

र्थैकदेशात्वात् नञर्थतावच्छेदकत्वात्॥ संसर्गविकस्य स्वरूपे॥ अभावस्यापि संसर्गविकत्वात् इति भावः
चेत्रापि तेत्यादविति पितृशब्दार्थे तिनकमुपमानं तदकदेशे जनकत्वे चेत्रस्यान्वयः। समुदायस्य इति। अन्योन्या
भावस्यार्थः। इतरत्वे वै दृष्टान्वयः घटपदार्थान्वयः। परपरासंबंधेन च प्रतियोगिकाश्रयत्वसंबं
धेन। आहुरित्यस्य स्वरसं तु इतरपदार्थस्य घटादेः स्वप्रतियोगिकाश्रयत्वस्य घटप्रतियोगिकाश्र
यत्वेन समं परपरासंबंधेसंबंधिनि लक्षणा तस्य च तादात्म्यसंबंधेन नञर्थपदार्थयोरन्योन्याभावो भवति अन्वय
इत्युच्यते तदानीं कः शेषः किं न घटः पट इति वाक्यजन्यबोधानंतरं घटे घटप्रतियोगिकभेदो नास्ति
इति शेषः स्यात्। घटे घटप्रतियोगिकभेदत्वेन रूपेण घटप्रतियोगिकभेदस्यानिश्चयादिति दोषो वैसेष
एकं चेति। समीचीनं चेत्यर्थः। अभाववन्नैतकत्वाभावे नञ्जपदोत्तरं तु षष्ठ्यास्तु लोपो नियतस्थले विल
क्षणा व्युत्पत्तिः अर्थकारे वेति पाठः। समानविभक्तिकतानुपपत्तेरिति। एकधर्मावच्छिन्नत्वरूपसामानाधि
करण्याभावात्। विशेष्यतासंबंधेन शाब्दबुद्धिं प्रति विशेषतात्रलिंगादयः॥ प्राधान्यविशेष्यस्य विशेषणस्य इत्यनुशा
सनेन विशेषणपदोत्तरं विशेष्यपदोत्तरा विभक्तिः समानविभक्तिविधानात् नियतस्थले अन्येन व्युत्पत्ति
रिति नियतातिरिक्तनामार्थयोरेव भेदेनान्वयो व्युत्पन्नः तथा च नियतातिरिक्तनामार्थनिष्ठतादात्म्या
तिरिक्तसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धिं प्रति प्रत्ययनियता
तोऽन्यतरान्वयस्थितिः कारणं नियतार्थनिष्ठतादात्म्यातिरिक्तसंबंधावच्छिन्नप्रकारतानिरूपित
विशेष्यतासंबंधेन शाब्दबुद्धिं प्रति तु पदजन्योपस्थितिः कारणमिति भावः। इति विलक्ष
णा व्युत्पत्तिरूपकेतोः। पदतदभावयोरिति च तदभावपदयोः प्रतिशेषः। प्रतियोग्यनुयोगिभावेनेति।
आश्रयाश्रयिभावेन चेति शेषः। प्रतियोगित्वानुयोगित्वयोरिति। घटाभावपटाभावयोः प्रतिशेषः

आह। चंद्रइवमुखमित्यादाविति। तत्सदृशत्वस्य कर्त्तृत्वं चंद्रसदृशत्वस्य कर्त्तृत्वं तात्पर्यं आह कर्त्तृत्वं चंद्रपदं चंद्रसदृशं प्रती
प्रतियोग्यनुयोगिभावेनेति। आश्रयाश्रयिभावेन चेति शेषः प्रतियोगित्वानुयोगित्वाभ्यां आश्रयत्वाश्रयित्वी
भ्यां चेति तदर्थः। नन्वत्र पदद्वयेति। आदिपदेन नञ्पदपरिग्रहः। अतएव निपातास्यत्वे विलक्षणा व्युत्पत्तेरेवा छुपो
चंद्रइवार्थ योर्भेदेनान्वयेति। इवपदार्थभेदश्चात्रैवतत्र धर्मवत्त्वरूपसादृश्यं चंद्रपदार्थस्य चंद्रस्य सैव
प्रतियोग्यनुयोगिभावेनान्वयत्वेन वाचकत्वेति अर्थः। अतएव निपातस्यत्वे विलक्षणा व्युत्पत्तेरेव। एतदभावे तत्वा
पोरन्वयइति। चंद्रतदभावयोः प्रतियोग्यनुयोगिभावेनान्वयइत्यर्थः। निष्कृष्टं कः निर्दुष्टः। मानाभावात् निपा
तस्यत्वे विलक्षणा व्युत्पत्तेर्गौकारमानाभावात्। ननु निपातास्यत्वे विलक्षणा व्युत्पत्तेर्गौकारे कथमिवप
दार्थसादृश्ये चंद्रपदार्थस्य चंद्रस्य भेदेनान्वयइत्यतएव दिरूपतात्पर्यं आह कं अतएव इवपदस्यती
त्पर्यं आह कर्त्तृत्वेनेति चंद्रपदस्य चंद्रसदृशत्वस्य कर्त्तृत्वादेव। चंद्रमिव मुखं पश्यामीत्यत्र द्वितीयेति। द्वितीं
याचंद्रपदोत्तरद्वितीयाविशेष्येण सहैकार्थ्यं कर्त्तृत्वेन नित्यानुज्ञानुशासनं प्रवृत्तिसंभवादिति भावः
अन्यथा चंद्रपदस्य चंद्रसदृशत्वस्य कर्त्तृत्वाभावे। तदनुपपत्तेरिति। चंद्रमिव मुखं पश्यामीत्यादौ चंद्रप
दोत्तरद्वितीयानुपपत्तेरित्यर्थः। विशेष्येण सहैकार्थ्यत्वाभावेनान्वितानुशासनं प्रवृत्तिसंभवादिति भावः
इदमुपलक्षणं निपातानां वाचकत्वे वाच्यादौ च। न चैवं स्यात्। तथाहि। शरीरं रसेरवोदीव्यानु
कुरिष्यन्नरत्यानिवेत्यादौ रसादिसदृशैः शरीरादिभिः सदृशानुदीच्यानरुकुरिष्यन्नित्यर्थः अयं चोत्प्रेक्षादिशब्दा
नामुपमादिसदृशशब्दस्य सादृश्यवाचकत्वे सुरसशब्दस्य विशेष्येण शरीरेण सहैकार्थ्यत्वाभावादुपमा
दोत्तरतृतीयानुपपत्तिः। एवं वागर्थाविव संपृक्तौ पार्वतीपरमेश्वरौ वंदेऽत्र वागर्थतुपा

विशेष्याभ्यां पार्वतीपरमेश्वराभ्यां सहैकार्थ्यत्वाभावाद्वागर्थपदोत्तरद्वितीयाविचनानुपपत्तेरित्यादिकं
सुज्ञानमिति दिक्। ननु चंद्रपदस्य चंद्रसदृशत्वस्य कर्त्तृत्वाभावे रसादिशब्दस्य चेत्यर्थः पूर्वतामुक्ता
स्तु वेत्यादि अथवा ननु वागर्थाविव संपृक्तावित्यत्र वागर्थपदस्य वागर्थसदृशत्वस्य कर्त्तृत्वे वागर्थयोरुपमा
नोपमेयसाधारणसंपृक्तरूपविशेषणानामनुपपत्तिः तयोः पदार्थैकदेशत्वात् न चोपमानोपमेयसा
धारणसंपृक्तादिरूपविशेषणानामुपमानमात्रान्वयिनोपमानान्वयीति वाच्यं। चिंतारत्नमिवच्युतो करतो
धिरंतं भाग्यस्य ते। सक्रोधमत्ति तारानन्नशुद्धाः कुलवधूरिवेत्यादावुपमानोपमेयोत्प्रेक्षणवचनभेद
स्यादौ च प्रसंगात्। एवमवादीनां द्योतकत्वे। त्वोत्प्रेक्षणवचनानंदः सुखैव मुहुः कारणमात्रमुरु
सभा कृष्टसर्वलोकानितंबिनी। इत्यादौ त्वोत्प्रेक्षा सुरप्रभुमेव समो कृष्टसर्वलोकानितंबिनी।
इत्यादौ त्वोत्प्रेक्षा सुरप्रभुतावदानां त्वोत्प्रेक्षा सदृशी सुरासदृशी प्रभुनासदृश्यर्थकत्वे उपमानभूता
सुत्वोत्प्रेक्षा सुरप्रभुतासुश्रानंदमदकारणासमाकृष्टसर्वलोकरूपोपमानोपमेयसाधारणविशेषणा
नामन्वयानुपपत्तिरपि द्वोध्या। त्वोत्प्रेक्षा सुरप्रभुतानां पदार्थैकदेशत्वात्॥ एवं अनवेक्षेव राजश्री
दैन्येवमनश्चिता। मन्त्रीसाचिव्यया देवपत्नीवदिनाभ्रसी। इत्यत्र राजश्रीमनश्चिता पत्नीवा
राजनां राजश्रीसदृशी मनश्चिता सदृशी पत्नीवसदृश्यसदृश्यर्थकत्वे उपमानभूता सुराजश्री
मनश्चिता पत्नीषु स्वातिरूपोपमानोपमेयसाधारणधर्मान्वयानुपपत्तिरपि द्वोध्या। तथा च इवा
दिशब्दस्य सादृश्यवाचकत्वं नतु सादृश्यद्योतकत्वं। एवं वागर्थाविवेत्यादौ द्वितीयाविभि

किं साधुत्वमात्रादुत्पादः॥ षष्ठ्यर्थस्य संबंधत्वाद्विभक्तौ लक्षणेति॥ चंद्रपदोत्तरप्रथमा
विभक्तेर्लक्षणेत्यर्थः। ननु सुप्विभक्तौ नेत्यनुवर्तत इत्याह॥ अनुशासनानुसारादिति। नियतप्रयोगः केचिदव्ययाः स्वनुशास
नानुसारात्तदर्थः। चंद्रदृश्यमुखमित्येव प्रयोगात्। चंद्रस्येवमुखमित्ययोगाच्चेति भावः। न तु चंद्रस्येवमुखमित्यत्रैव चंद्र
मिवमुखं पश्यामीत्यत्रापि चंद्रपदोत्तरविभक्तेः षष्ठ्यर्थत्वलक्षणाया चंद्रपदस्य मुखपदेन सहैकार्थत्वाभा
वात्। विशेष्यतासहकार्थमित्याद्यनुशासनं प्रवृत्तेः। चंद्रमिवमुखं पश्यामीत्यत्र कथं चंद्रपदोत्तरद्वितीयेति
चेत्। न लिंगसंख्याविभेदेऽपि रूपमानो पमेयता विभक्तिः। पुनरेकैवंपमानोपमेययोरित्यनुशासनेन तत्र द्वि
तीयोपपत्तेः। ननु नियतस्यत्वे विलक्षणव्युत्पत्त्यनंगीकारे घटो नास्तीत्यत्र कथं घटतदभावयोरन्वय इ
त्यत आह। घटो नास्तीत्यत्रापि इति। तथा घटपदोत्तरप्रथमा षष्ठ्यर्थः। चंद्रादिपदोत्तरप्रथ
मादिविभक्तेः षष्ठ्यर्थलक्षणाकल्पकत्वे दोषः॥ न अन्वयानुपपत्तिः कल्पकत्वे दोषो नेत्यर्थः। घटो नास्ती
त्यत्र भूतले घटो नास्तीत्यत्र घटस्याभावो स्तीति नार्थः। भूतले घटस्याभावोऽस्तीति नार्थः। भूत
लवृत्तित्वान्वितघटाभावविशेष्यकास्तित्वैकप्रकारकशाब्दबोधांगीकारे सति भूतले घटो
नास्तीत्यस्याप्युपपत्तेः। भूतले घटो नास्तीति वाक्यस्य योग्यत्वोपपत्तेः। अभावस्यैकत्वादिति। घटद
ण्डादिभिन्नाभावस्यैकत्वादित्यर्थः। घटो स्तीत्येतद्वत्तरमर्थं इति प्राक्तनमनुवर्तते। क
थं तर्हीति। तर्हि भूतलवृत्त्यभावप्रतियोगिघटो स्तीति बोधांगीकारे भूतलवृत्तिघटाभावो
स्तीति बोधांगीकारे घटो नास्तीत्यादिरिति चेत्तदिति। कथं घटो नास्तीत्यादीति बोध्यम्। आ
दिपदेन घटनमसंतीत्यस्य संग्रहः। घटदण्डत्वावच्छिन्नाभावस्य घटदण्डत्वावच्छिन्नाभा

वस्यैकत्वे नहि वृत्तित्वयोरन्वयासंभवादनुपपन्नतां घटो नास्तीत्यस्यापि रूपिवोध्याभावप्रतियोगिसंख्या
दिभिन्नाख्यातार्थः तदन्वयीयोभावः तत्प्रतियोगिनिसंख्याताद्यर्थद्वित्वसंख्यान्वयत्वात्। एवं घटनमसंतीत्यत्रा
स्तित्वरूपभावनान्वयीयो घटत्वं त्वावच्छिन्नाभावस्तत्प्रतियोगिघटद्वयो आख्यातार्थद्वित्वसंख्यान्वयत्वात्
। एवं घटनमसंतीत्यत्रातिरूपभावनान्वयीयो घटत्वत्वावच्छिन्नाभावस्तत्प्रतियोगिनि घटत्वे आख्यातार्थव
द्वित्वसंख्यान्वयात एव घटो नास्तीत्यस्यापि रूपिनास्ति। अस्मिन्नेव रूपभावनान्वयीयो घटद्वयत्वावच्छिन्नाभावस्त
त्प्रतियोगिनि घटद्वये आख्यातार्थैकत्वसंख्यानन्वयात आख्यातस्य भावनान्वयितावच्छेदकत्वापसंख्या
वाचकत्वस्यांगीकारात् कथमिति चेदिति॥ भावनान्वयिभावप्रतियोगिनिसंख्यान्वयः कथमिति चेद्
त्यर्थः। तथैव प्रतीतेरिति। घटो नास्तीत्यादौ भावनान्वयिभावप्रतियोगिविशेष्यकाख्यातार्थसंख्याकार
कप्रतीतेरित्यर्थः। इति गदाधरोक्तिः। भावनान्वयिभावप्रतियोगिनि संख्यान्वयस्तात्पर्यः। परे तु। इह भूत
ले घटो नास्तीत्यादौ क्रियापदसमभिव्याहृतनञ्पदस्यान्वयाद्वारा। भूतलवृत्तित्वरूपाख्यातार्थनिषेध
एवेति॥ भूतलनिरूपितविशेष्यतानाख्यातार्थनिषेधप्रतियोगित्वरूपाख्यातार्थनिषेध
योर्घटेषु प्रतीयत इत्यर्थः। न पचतीत्यत्रेत्यत्रेति। न पचतीत्यत्र यथा चैत्रे पाकानुकूलवर्त
मानप्रवृत्तिरूपाख्यातार्थनिषेधः प्रतीयते तथेत्यर्थः। नातेहि वचनानुपपत्तिरिति। अतो भूतले घटो नास्ती
त्यादौ भूतलवृत्तित्वरूपाख्यातार्थनिषेधस्य घटद्वये प्रतीतेः। नहि वचनानुपपत्तिः। घटो नास्ती
त्यादौ नाख्यातहि वचनानुपपत्तिः। निषेधस्य भावनाप्रतियोगिकाभावान्वयिनि आख्यातार्थसंख्या
न्वयादिति भावः। न चैवमिति। एवं न आसर्वत्राख्यातार्थनिषेधस्य भावनाप्रतियोगिकाभावबोधने
वृत्तिकागतिः कस्याभावप्रतीतिः। न च त्र आर्तत्वाप्रयोजकत्वाभावस्यैव प्रतीतिरित्यत आह। आदिवृत्तित्वाभावस्य
सत्तायामसत्त्वादिति। एकार्थसमवायसंबंधेन सत्तायामादिवृत्तित्वादिति भावः। ननु सत्तायां आदिवृत्तित्वा

भावास्त्वेपि जाति जातिसंमवेतत्वाभावस्यैवसत्त्वात्सत्ता या जातिसमवेतत्वाश्रयत्वं तत्रा प्रत्याप्ता मि
त्यतश्चोक्तं जातिसमवेतत्वस्य चेत्यादि। निषेधुमति न जातिरश्रयत्वस्याभावं बोधयितुमित्यर्थः॥ या गतिर्जातिर्न
सत्ता वर्तिरिति वाक्यस्योत्। सत्ता न जाति वर्तिरिति वाक्यार्थ बुद्धिमावच्छिन्न प्रतियोगिताकभेदप्रतीतिः तद्धर्मीभावप्र
तीतिरित्यर्थः। सा सत्ता संबंधावच्छिन्न वर्ति परमिति सा सत्ता संबंधेन जाति वर्ति जातित्वादितद्भेदस्य सत्तायां सत्त्वात्। तुल्य
मिति। सत्ता न जाति वर्तिरिति वाक्यस्यायोग्यत्वे सतीति सत्ता नास्तीति वाक्यस्यायोग्यत्वे सतीति सत्ता नास्तीति
रिति वाक्यस्य सा सत्ता संबंधावच्छिन्न जाति वर्तित्वावच्छिन्न प्रतियोगिताकभेदबोधकत्वे जातौ सत्ता नास्तीति वाक्य
वाक्यस्य सा सत्ता संबंधावच्छिन्न जाति वर्तित्वावच्छिन्न प्रतियोगिताकभेदबोधकत्वे जातौ सत्ता नास्तीति अश्रयत्वा
स्य सा सत्ता संबंधावच्छिन्न जाति वर्तित्वावच्छिन्न प्रतियोगिताकभेदबोधकत्वे जातौ सत्ता नास्तीति कथमन्वेतीति
भावे बोधकत्वमित्यर्थः। तथापि भूतले घटो नास्तीत्यादौ न आख्यातार्थ निषेधबोधनेपि कथमन्वेतीति
नामार्थयोर्भेदेनान्वयस्यानुपपन्नत्वादिति भावः। नामार्थेन निपातातिरिक्तनामार्थेन। अभेदेनान्वयः। आ
भेदेनैवान्वयः। न नामार्थमात्रस्येति। न नामार्थमात्रस्य नामार्थमात्रेणाभेदेनैवान्वय इत्यर्थः। मात्र
पदकृत्स्नार्थकं प्रतिपत्तिस्वीकुर्वन्ति स्यादेतदिति। एतत् वक्ष्यमाणं। अत्यंताभाव एवेति। अत्र प्रतीयत इति
प्राक्तनमनुवर्तते। प्रतियोग्यनुयोगिपदयोरिति। प्रतियोग्यनुयोगिबोधकपदयोरित्यर्थः। समानविभक्तिक
तिः समानत्वं च भक्तिविभक्तिकप्रथमान्यतमत्वेन। अन्योन्याभावबोधेइति॥ अत्र ते चत्वाभावबो
रिति बोधः। सर्वस्य भावादितीति अनुयोगिवाचकचैत्रपदघटपदोत्तरसप्तम्यभावादित्यर्थः। तथा चानु
योगिवाचकचैत्रादिपदोत्तरसप्तमीविभक्तेस्तभावविनियमवत्त्वे चैत्रादौ पाकानुकूलत्वलाप
तातावबोधने व्यभिचारात् अनुयोगिवाचकपदोत्तरप सीविभक्तेर्नास्तीतभावबोधने तत्त्वमिति भा

वः। अन्यद्विशेषणं क्रियाविशेषणं त्वेनुं तृतीयैकवचनांतं पचतीत्याख्यातांतसमानविभक्तेरभावा
द्येति॥ अनुयोगिप्रतियोगिवाचकयोरन्यपदवपदयोः समानविभक्तेरभावश्चेत्यर्थः। अत्राहुरिति। अत्र किं
निनुक्तनिपातकप्रत्ये आहुः निपातकमाहुः। इति शेषः। नत्विति निषेधे नञ् पदं विना प्रतियोग्यनुयो
गिपदयोः प्रतियोग्यनुयोगिवाचकपदयोः। तत्रैतादृशानुयोगिवाचकपदसमभिव्याहृतनञ्पदे। अन्यत्र प्रतियो
ग्यनुयोगिपदयोर्भेदेनान्वयबोधे आकांक्षास्थले। अन्यबोधकत्वं अत्यंताभावबोधकत्वे अस्तिवेति॥ आ
कांक्षेत्यत्रैतत्रेनान्वयः। नञस्तत्वे नञ्पदाभावे अभेदान्वयबोधे आकांक्षेतिनामार्थयोर्भेदेनान्वयबोध
स्याव्युत्पन्नत्वादितिभावः। अतः नघटः पटइत्यत्र नञ्पदासत्वे घटपदयोरभेदान्वयबोधे आकांक्षासत्त्वात्।
तत्र नघटः पटइत्यत्र। अन्योन्याभावप्रत्ययः नञ्पदघटयोरन्योन्याभावप्रत्ययः। तत्र भूतले नघटइत्यत्र संसर्ग
भावप्रत्यय इति। नञ्पदात्संसर्गाभावप्रत्ययः। नञ्पदघटयोरत्यंताभावप्रत्ययइतिभावः। अनेनाभावत्वं तरभि
तिशक्तित्वस्य तद्भिन्नं न वर्तिपदशक्यमित्यर्थः। तेन आश्रयासिद्धिः प्रतियोग्यप्रसिद्धिश्चेत्यर्थः
शः। यद्वा शक्तिवर्तिपदशक्यत्वावच्छेदकं शक्तित्वस्य तद्भिन्नं न वर्तीत्यर्थः। तेन शक्तित्वस्य
न्यतरभिन्नस्य वर्तिनामकपुरुषादेर्वर्तिपदशक्यत्वेपि न बाधः। तदर्थसिद्धिरिति॥ अस्यार्थस्याश्रया
दित्यर्थः। यद्वा अंतनाप्रयोजनसिद्धिरित्यर्थः। इदं अंतनाप्रयोजनं अंतरं खेदं न॥ अपुनरुक्तं सम्यक्। तथाहि
अपुनरुक्तत्वमेव नाहि। मुख्यार्थेनाज्ञानकत्वेनाभिमतपदकिंचित्पदमुख्यार्थेइतरत्वयानुपपत्तिरिति
समभिव्याहृतपदकिंचित्पदार्थान्वयानुपपत्तिश्चेतिरित्यर्थः। न च अंतनायोसा सर्वत्रास्तीति अंतनायोसर्व
